
**Weekend Worksheet – 2014-15**

# SANSKRIT

| | | | | | |
|---|---|---|---|---|---|
| Class ▶ | VI | Section ▶ | | Date ▶ | |
| Name ▶ | | | | Roll No. ▶ | |

चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त-पदानां साहाय्येन संस्कृते पञ्च-वाक्यानि रचयन्तु –



**मञ्जूषा**

सूर्यः, पर्वतः, वृक्षः, पतन्ति, चत्वारि, फलानि, कमलानि, उत्पतन्ति, उदयति, विकसन्ति, खगाः

अधोलिखितम् अनुच्छेदं पठित्वा संस्कृतभाषायां प्रश्नान् उत्तरन्तु –

महर्षिः एकं सन्देशं दत्वा पुनः शिष्यं तत्र प्रेषितवान् । शिष्यः तत्र गत्वा अकथयत् – "अस्माकं स्वामी कथयति – "यत् भवतः अमृतवर्षया बहुशक्तिः नष्टा । पुनः अमृतवर्षायै शक्तिं प्राप्तुम् एतानि मधुराणि रसयुक्तानि फलानि स्वीकरोतु ।" एतत् श्रुत्वा सः यात्री लज्जितः भूत्वा धावित्वा च महर्षेः समीपम् आगत्य पादयोः पतित्वा अकथयत् – "क्षमस्व महर्षे ! क्षमस्व । अहम् अपराधी अस्मि । भवान् देवः । क्षमस्व । क्षमस्व ।" इदं सर्वं दृष्ट्वा शिष्याः चकिताः आसन् ।

**I. एकपदेन उत्तरन्तु –**

(*i*) के चकिताः आसन् ? ........................

(*ii*) कः लज्जितः अभवत् ? ........................

**II. पूर्णवाक्येन उत्तरन्तु –**

(*i*) शिष्यः तत्र गत्वा किं अकथयत् ? ........................

(*ii*) महर्षिः किम् दत्वा पुनः शिष्यं तत्र प्रेषितवान् ? ........................

**III. निर्देशानुसारम् उत्तरन्तु –**

(*i*) 'प्रेषितवान्' इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम् ? ........................

(क) महर्षिः (ख) शिष्यम् (ग) संदेशम् (घ) तत्र

(*ii*) 'सः यात्री' अनयोः पदयोः विशेषणपदं किम् अस्ति ? ........................

(क) सः (ख) यात्री (ग) पदम् (घ) अत्र

(*iii*) 'अहम्' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम् ? ........................

(क) अस्मि (ख) अपराधी (ग) अहम् (घ) कथयति

(*iv*) 'दूरम्' अस्य किं विलोमपदम् अत्र प्रयुक्तम् ? ........................

(क) तत्र (ख) समीपम् (ग) पुनः (घ) इदम्